लोकप्रियसाहित्यग्रन्थमाला-69

# सृजति शङ्खनादं किल, कविता

प्रधानसम्पादकः
**प्रो. परमेश्वरनारायणशास्त्री**
कुलपतिः

प्रणेता सम्पादकश्च
**विन्ध्येश्वरीप्रसादमिश्रो 'विनयः'**

मुक्तनिध्वानः

गीतगुञ्जारवः

पद्यप्रस्तारः



राष्ट्रिय-संस्कृत-संस्थानम्
मानितविश्वविद्यालयः, नवदेहली

# कविप्रशस्तिः

प्राग्भारो भूमिभूतेर्भवभविकभरो
भारतीमर्मसारो
वात्सल्याद् गात्रगोत्रे जननिमृदु-
करामर्शचारोऽत्युदारः।
संवादः कोऽपि तौर्यत्रिकरसमिलितः
स्वर्गसौभाग्यनादो
विन्ध्येश्वर्य्याः प्रसादः प्रभवतु सुधियां
भावधारासु शश्वत्।।

भारतराष्ट्रपतिसभाजिताः कविविद्वन्मूर्धन्याः स्वर्गीया
ज्ञानोपाह्वा आचार्य्यबच्चूलालावस्थिनः

## १६. भवभूतिं प्रति

जानन्ति ये जानन्तु ते,
किमिहोत्तरेण? कवे! मुधा।
ते दर्पदोलाऽऽन्दोलिताः
स्थितिमाप्नुवन्तु कथं क्रुधा।।
जानन्ति ये जानन्तु ते...।।

प्रथयन्त्यवज्ञां तावकीं प्रथमे पदन्यासेऽपि ये,
पश्यन्ति ते नासङ्गतिं
स्वकृतां तु हन्त! यशःक्षुधा।।
जानन्ति ये जानन्तु ते...।।

रघुनन्दनस्यानिन्दिते चरिते रमन्ते नो भिया
सन्तीह लङ्कासंस्थिताः
कति माल्यवन्त उदायुधाः।।
जानन्ति ये जानन्तु ते...।।

प्रणयाकुले यूनां हृदि प्रभवन्ति किं बन्धाः क्वचित्?
प्रीणाति रुद्धा 'मालती'
ननु 'माधवं' रसवीरुधा।।
जानन्ति ये जानन्तु ते...।।

करुणा त्वदीया द्रावयत्यपि वज्रसारान् पर्वतान्
नो ये द्रवीभूता जना
गुणगर्विता बत! तेऽबुधाः।।
जानन्ति ये जानन्तु ते...।।

विपुलाऽवनी, कालोऽप्ययं निरवग्रहोऽस्मिन् मन्थने,
सम्पत्स्यते ते नूनमेव
समानभावमयी सुधा।।
जानन्ति ये जानन्तु ते।।

***



## विन्ध्येश्वरीप्रसादो मिश्रो 'विनयः'

कवी रसज्ञश्च।
वेदान्ते साहित्ये पुराणनिचये निविष्टधीर्नित्यम्॥

श्रीमद्भागवतस्य रहस्यविदध्यात्मशोधको, वक्ता।
'कात्यायन'-गोत्रोद्भव-पण्डितरत्नोमादत्तस्य सुतः॥

अम्बा 'रामकली देवी' चेत्येतस्य वत्सला धन्या।
जन्मोत्तरप्रदेशेषु स्थिरवासस्तु मध्यदेशेऽभूत्॥

पूर्वं, 'सागर'-संस्थे तथोज्जयिन्यामवस्थिते भव्ये।
'हरिसिंह गौर'-सञ्ज्ञे 'विक्रम'-नाम्नाऽथ विश्रुते, क्रमशः॥

अध्याप्य विश्वविद्यालययोर्येनार्जितं यशः शुभ्रम्।
द्वाविंशतिवर्षेभ्योऽप्यधिकं चाध्युष्य शोध-बोध-धिया॥

सम्प्रति

काशीहिन्दूविश्व-सुविद्यालयस्य सङ्काये।
संस्कृतविद्या-धर्मोजित-विज्ञानान्विते महत्पुण्ये॥

वैदिकदर्शननाम्ना-सुप्रथितेऽभ्यर्हिते विभागेऽत्र।
आचार्य्य-पदावस्थः सन्नाराध्नोति विश्वनाथपदम्॥

**राष्ट्रियसंस्कृतसंस्थानम्**

(भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः,
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः)
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058
दूरभाष : 011-28524993, 28521994, 28520977
email : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in